Regd. No. KA/SK/MYS-107/2015-17
R.N.I. No. 20007/70

स्थापना : 1970

E-mail-sudharma.sanskritdaily@gmail.com
E-paper-sudharma.epapertoday.com
Website-www.sudharmasanskritdaily.in

# सुधर्मा

संस्थापकसम्पादकः
गीर्वाणवाणीभूषणं विद्यानिधिः
पण्डित कळले नडादूरु वरदराजय्यङ्गार्यः

केन्द्र-कर्णाटकसर्वकाराभ्यां पुरस्कृता अद्वितीया संस्कृतदिनपत्रिका
SUDHARMA-THE ONLY SAMSKRITHA DAILY

सम्पुटः-४७ सञ्चिका – ६९ मैसूरु श्रीदुर्मुखीनामसंवत्सरे दक्षिणायणे शरदृतौ आश्वयुजशुक्ल प्रतिपदादि सप्तम्यां मूलानक्षत्रयुक्त सोमवासरः १० अक्टोबर २०१६ मूल्यम्: ₹ १.२५

## सुभाषितम्

यस्य स्नेहो भयं तस्य स्नेहो दुःखस्य भाजनम् ।
स्नेहमूलानि दुःखानि तानि त्यक्त्वा वसेत्सुखम् ।।

***One who is infatuated with someone or something faces a threat*** from the same someone or something. Because it has become his weakness. It breeds a host of problems and worries. Given up infatuation if you want to be happy and in control of yourself. **(कौटिल्यस्य नयः-१३)**

## शठं प्रति शाठ्यम्

शान्तिप्रियोऽपि भारतदेशः पाकिस्तानस्य दुष्कृत्यम् असहमानः तत्र प्रविश्य तत्रत्यान् हिंसापरान् उग्रवादिनः त्रिंशदधिकान् अवधीत् । पाकिस्थानं पापिस्थानं भूत्वा भारतवर्षं पीडयितुं द्रोहिणः प्रेषयति । कतिपयदिनेभ्यः प्राक् पापिष्ठाः उग्रवादिनः अस्माकम् अष्टादश सैनिकान् अवधिषु । तस्य दुष्कृत्यस्य योग्यम् उत्तरं दातव्यम् आसीत् । अधुना तद्दत्तम् । एतदर्थम् अस्माकं सैनिकान् अभिनन्दामः। समस्तो देशः सैनिकान् समर्थयते । देशस्य सुरक्षायाः विषये भारतदेशः कदापि अजागरूको न भवतीति संदेशः पाकिस्थानाय दत्तः ।

इदानीं शत्रुः तूष्णीं न तिष्ठति । केन रूपेण कदा स आक्रमणं करिष्यतीति न ज्ञायते । भारतवर्षेण सदा युद्धाय संनद्धेन भवितव्यम् । पाकिस्थानस्य मूर्खाः सेनानायकाः किमपि कर्तुं वाञ्छन्ति । तेषां चेष्टां नियन्त्रयितुं सेनायै सर्वैः समर्थना देया । समस्तो देशः एका व्यक्तिरिव उत्तिष्ठेत् । प्रधानमन्त्रिणा श्री नरेन्द्रमोदिना यो निर्णयः स्वीक्रियते, स समग्रस्य देशस्य निर्णयः । मतभेदं विना देशस्य सर्वाः प्रजाः सकलं त्यागं कर्तुं सिद्धाः भवेयुः । तस्माद् युध्यस्व भारतेति गीतावाक्यं स्मरणीयम् ।

## उग्राणाम् आक्रमणयत्नः विफलः

श्रीनगरे-पाकिस्तानेन आक्रान्ते काश्मीर प्रदेशे भारतं प्रति अक्रमेण प्रवेष्टुं कृतयत्नान् कांश्चन् उग्रान् भारतीययोधा अन्विष्य अघ्नन् । त्रिः उग्रैः प्रयत्नः अकारि। परं भारतीयभद्रता दलस्य सैनिकाः उग्राणां तान् प्रयत्नान् विफलान् अकुर्वन् । गुरुवारे प्रातःकाले सञ्जाते उग्रनिहननकार्ये योधाः चतुरः उग्रान् अघ्नन्। तथैव कुप्वारप्रदेशे सेनाशिबिरं प्रति आक्रान्तुं केचन उग्राः अयतन्त। जागरिताः भारतीययोधाः त्रीन् उग्रान् हतवन्तः। अतः सीम्नि निरीक्षणव्यवस्था इतोऽपि बलवर्धिता वर्तते । काश्मीरस्य नौगामवलये राम्पुरप्रदेशे च अक्रमप्रयत्नयत्नः विफलीकृतः। अतः निरन्तरमधुना योधाः जागरिताः सन्ति ।

## गन्धहुडिउत्सवः

मैसूरु-अत्रत्ये राजसौध प्राङ्गणे विराजमानानां श्री श्वेतवराहस्वामिनां देवालये भानुवारे (१६-१०-१६)गन्धहुडि उत्सवः प्रचलिष्यति।

## रामकृष्णाश्रमस्याध्यक्षाः

मैसूरु - अत्रत्यस्य श्रीरामकृष्ण-आश्रमस्य अध्यक्षाः श्रीमुक्ति-दानन्दस्वामिनः मुम्बयी-श्रीरामकृष्णमठस्य अध्यक्षस्थानम् अलङ्कर्तुं प्रस्थिताः। श्री आत्मज्ञानानन्दस्वामिनः इतःपरं मैसूरुरामकृष्णाश्रमस्याध्यक्षस्थाने विराजिष्यन्ते। विवेकप्रभाख्यायाः कन्नडमासिकपत्रिकायाः सम्पादका भूत्वा श्री आत्मज्ञानानन्दमहाराजाः विशिष्टां रामकृष्णसेवा कृतवन्तः। तेभ्यः साष्टाङ्गप्रणामान् अर्पयामः। रामकृष्णाश्रमे धार्मिकाः शैक्षणिकाः संस्कृतिसम्बन्धिनश्च कार्यविशेषाः सदा प्रवर्तन्ते। भक्ताः आत्मज्ञानलाभाय आश्रमं गत्वा ज्ञानं शान्तिं सान्त्वनां च लभन्ते।

## वाल्मीकिजयन्ती आचरिष्यते

मैसूरु-महर्षिवाल्मीकि जयन्ती आगामिनि शनिवासरे (१५-१०-१६) सर्वत्र आचरिष्यते। कर्णाटकसर्वकारेण एतदर्थं सार्वत्रिको विरामदिवसो घोषितः। सर्वकारस्योद्योगिनः अवश्यं वाल्मीकि वाल्मीकिजयन्ती महोत्सवे भागं गृह्णीयुः।

# राजस्थानराज्ये उष्ट्रविकासयोजना

जयपुरम्-भारतदेशे उष्ट्राणां संख्या वर्षे वर्षे हीयते इति हेतोः तेषां संरक्षणार्थं संवर्धनार्थं च राजस्थान राज्ये उष्ट्रविकासयोजना कार्यान्वयं नीता । एतदनुसारेण एकस्य उष्ट्रस्य जन्म तत्पालकाय दशसहस्ररूप्य-काणां लाभं कर्तुम् अर्हति । गान्धिजयन्तीदिने इयं योजना सर्वारेणारब्धर । एकस्य उष्ट्रशावकस्य जनने, उष्ट्रपालकः रूप्यकसहस्रत्रयं लभते। तस्योष्ट्र-शावकस्य नवसु मासेषु जातेषु पुनः रूप्यकसहस्रत्रयं तस्मै पालकाय दास्यन्ते । अष्टादशसु मासेषु गतेषु पुना रूप्यकसहस्रचतुष्टयं दास्यते पालकाय ।

भारतवर्षे केवलं चतुर्लक्षसंख्याः उष्ट्राः सम्प्रति जीवन्तीति ज्ञायेत। तन्मध्ये त्रिलक्षाधिकाः राजस्थान राज्ये एव वसन्ति । राजस्थानस्य राज्यप्राणी उष्ट्र एव घोषितः। अत्र उष्ट्रहननं दण्डनीयापराध इति च घोषितम् । उष्ट्रहननं कृतवान् पञ्च वर्षाणि कारागृहे वासं कुर्यात् इति शासनं वर्तते । बिकनीरपत्तने उष्ट्र-उष्ट्रसंशोधनकेन्द्रं (National Research Centre on Camel) वर्तते । तस्य निर्देशकः एन्.वि. पाटीलः राज्यसर्वकारस्य निर्णयं स्वागतीकृतवान्।

मरुभूमिनौकेति श्लाघ्यमाना उष्ट्राः जलं विनापि कतिपयानि दिनानि जीवन्ति। उष्णप्रदेशे कण्टकितरून् अपि खादित्वा जीवनं यापयन्ति । मानवेन उष्ट्रा युद्धेष्वपि उपयुक्ताः। एतेषां रक्षणं वर्धनं च मानवकुलस्योपकारकम् । अतो राजस्थानसर्वकारः प्रशंसार्ह इति ब्रूमहे ।

## भारतीयक्रिकेट्मण्डल्याः औद्धत्यम्

नवदिल्ली-भारतक्रिकेट्नियन्त्रण - मण्डल्याः प्रशासने पारदर्शकतानयनाय न्यायमूर्तेः लोधवर्यस्य अध्यक्षत्वे समितिः विरचितासीत्। तया समित्या उत्तमाः सूचनाः मण्डलीं प्रति प्रदत्ताः आसन्। परं मण्डली तासाम् अनुष्ठाने न कटिबद्धा वर्तते । अतः सर्वोच्चन्यायालयः अमुं विषयं गम्भीरतया परिगणय्य भारतक्रिकेट् नियन्त्रणमण्डली लोधासमिति - सूचनानाम् अनुष्ठाने औद्धत्यं प्रदर्शयन्ती वर्तते इति वाक्प्रहारमकरोत् । लोध्धासमित्याः सूचनानुसारेण मण्डल्या राज्यक्रिकेट्संस्थाः प्रति धनानुदानं न प्रदेयम्। किञ्च सप्ततिवर्षवयसः अपि अधिकवयसः मण्डल्यां शासनस्थाने न भवेयुः। एकस्मात् राज्यात् एकस्याः संस्थायाः एव मतदानस्य अर्हता भवेत्। तथैव सकृत् शासनारूढाः पुनः द्वितीयावधौ न स्पर्धेरन्। एवं प्रकारेण कठिणाः परम् उत्तमाः नियमाः संसूचिताः। परं एतद्विषये निर्णयस्वीकरणाय भारतीयक्रिकेट् नियन्त्रणमण्डली सेप्टेम्बरमासस्य त्रिंशे दिनाङ्के सभां निरुह्य लोधासमितेः प्रमुखाः तिस्रः सूचनाः पालयितुं न शक्यन्ते इति निरणैषीत् । तथैव राज्यक्रिकेट्मण्डलीभ्यः अनुदानं प्रादात्। एतेन सूचनोल्लङ्घनक्रमेण सर्वोच्च न्यायालयः क्रोधाविष्टः अभूत् । प्रकरणस्य विषये गुरुवारे सुदीर्घचर्चा सर्वोच्चन्यायालये समजनि। तदा मुख्य न्यायमूर्तिः टि.एस्.ठाकूरः भारतक्रिकेट नियन्त्रणमण्डल्याः क्रमं सम्यक् अनिन्दत् । तथैव सूचनापालनम् अनिवार्यतया भवेत् इति अवदत्। शुक्रवारे लोधासमितेः सूचनापालनम् अनिवार्यतया भवेदिति आदेशोऽपि प्रदीयते। 'स्वमनसः चिन्तानुसारेण स्वेच्छया निर्णयान् स्वीकर्तुं अनुरागठाकूरः कः? अहं सर्वोच्च न्यायालयस्य नायकः इति विषयः न विस्मरणीयः' इति टि.एस्.ठाकूरः भारतक्रिकेट् नियन्त्रणमण्डल्याः अध्यक्षम् अनुरागठाकूरं प्रति वाक्प्रहारम् अकरोत् । एतेन क्रमेण प्रायशः देशीयक्रिकेट्क्रीडाः न प्रचाल्यन्ते इति ऊहःवर्तते । यतः मण्डल्याः वित्तानुदानेन विना राज्यसंस्थाभिः क्रिकेट्क्रीडाः चालयितुं न शक्यन्ते इति अभिप्रायः दत्तः। अतः अधुना भारतक्रिकेट् नियन्त्रणमण्डल्याः अग्रिमपदन्यासः कुतूहलस्तरे वर्तते।

## कावेरी चिन्तां जनयति

बेङ्गळूरु-कावेरीजलानयन प्रदेशे अनावृष्टिः अस्मिन् वर्षे । जलाशयेषु अत्यल्पं जलमस्ति। तत् कर्णाटक राज्यस्य मुख्यनगराणां पिपासाम् अपि शमयितुं न पर्याप्तम्। तथापि निर्दयः तमिळुनाडुसर्वकारः पुनः पुनः अधिकं जलं कृषये प्रयाचते । किमपि जलम् इतः परं दातुं न शक्यम् इति कर्णाटकविधानसभायां निर्णीतम्। एतद्विषये सर्वोच्च-न्यायालयः किं करिष्यतीति न जानीमः। यदि सुवृष्टिः अभविष्यत् तर्हि समस्या नाभविष्यत्। उभयो राज्ययोः जलापेक्षा पूर्येत च । किन्तु वरुणस्य अप्रसन्नतया जलाभावः । येन केनापि मार्गेण वृष्टिः महतीं सम्पादनीया। तेलङ्गाणान्ध्रप्रदेशयोः अतिवृष्टिरभवत्। कोडगुप्रदेशे वृष्टिर्भवतु इति प्रार्थनीयं सकलैः। मेघैर्मेदुरमम्बरं दृश्यते । किन्तु जलबिन्दवो न पतन्ति। कर्णाटक सर्वकारो वा केन्द्रसर्वकारो वा किं कुर्यात्? सर्वैर्मन्त्रिभिः पर्जन्यजप आरम्भणीयः । कलियुगे मन्त्रशक्तिर्नष्टा । मन्त्रजपं कर्तुम् अर्हा विप्रा एव विरलाः। अतोऽद्य मार्गो न दृश्यते कोऽपि । भक्त्या भगवन्तं प्रसन्नीकर्तुं समर्थाः सन्ति चेत् केऽपि, ते तथा कुर्वन्तु इति प्रार्थयामहे ।

## रामचन्द्रपुरमठे शपथपर्व

बेङ्गळूरु - रामचन्द्रपुरमठस्य निर्वहणाय सर्वकारस्याधिकारी नियोजयिष्यते इति प्रस्तावं विरुध्य शनिवारे प्रतिभटनासूचनाय शपथपर्व आचरिष्यते इति ज्ञायते। । श्रीराघवेश्वरभारतीस्वामिनां नेतृत्वे प्रतिभटना करिष्यते । तत्र धर्मनेताः मठस्य भक्ताश्च भागं स्वीकरिष्यन्ति।

गोकर्णक्षेत्रस्य महाबलेश्वर-देवस्थानं स्ववशीकर्तुं सर्वकारेण क्रियमाणं प्रयत्नं विरुध्य च प्रतिभटना भविष्यति। एवं देवालयस्य वशीकरणं नोचितम् इति मन्त्री श्रीमान् आर्.वि.देशपाण्डे महाशयः मुख्यमन्त्रिणे पत्रं लिखितवान् इति च ज्ञायते ।

## श्रीरङ्गपट्टणे उत्सवः

श्रीरङ्गपट्टणम्-नवम्बरमासस्य ५तम दिनाङ्के शनिवासरे सायं ६.३० समये श्री वेदान्ताचार्याणां गन्धहुडि उत्सवः प्रचलिष्यति ।